शास्त्रीयग्रन्थमाला-८

पाणिनीयाष्टाध्याय्या

# नव्यसिद्धान्तकौमुदी

इत्यपरनामविभूषितं

# पौष्पं प्रक्रियाविज्ञानम्

तत्र त्रयोदशो भागः

## स्वरप्रक्रियाविज्ञानम्

प्रणेत्री सम्पादयित्री च

**दीक्षितपुष्पा**

सम्पादनसहायिके

**किरणवाजपेयी, शिवकुमारीकाटुरिश्च**

**राष्ट्रियसंस्कृतसंस्थानम्**

**मानितविश्वविद्यालयः**

**नवदेहली**

शास्त्रीयग्रन्थमाला-८

पाणिनीयाष्टाध्याय्या

# नव्यसिद्धान्तकौमुदी

इत्यपरनामविभूषितं

## पौष्पं प्रक्रियाविज्ञानम्

तत्र त्रयोदशो भागः

# स्वरप्रक्रियाविज्ञानम्

प्रणेत्री सम्पादयित्री च

**दीक्षितपुष्पा**

सम्पादनसहायिके
किरणवाजपेयी, शिवकुमारीकाटुरिश्च

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# मदीयस्वरः

इयं महर्षिभिरन्वाख्याता देववाणी स्वीयानुशासनेन, पाणिनीयप्रकाशेन च विश्वस्य सर्वमपि भाषानिकरमतिशेते। अत्रत्यः शब्दराशिर्द्विविधः, लौकिको, वैदिकश्च। सर्वशास्त्रोपकारकं पाणिनीयव्याकरणशास्त्रं वेदार्थज्ञानोपायभूतं, वेदरक्षोपायभूतञ्च लौकिकैः सह वैदिकशब्दानपि निष्पादयति। वस्तुतस्तु नास्ति तात्त्विको भेदः कश्चनोभयोर्मध्ये। ये लौकिकाः शब्दास्ते सर्वे वैदिकाः सन्त्येव, किन्तु सन्ति केचन शब्दास्तादृशा, ये वैदिका एव सन्ति न लौकिकाः। ते वैदिकशब्दा लौकिकैः सहैव प्रक्रियामर्हन्ति, अतो भगवता पाणिनिना तेषां साधनाय सूत्राणि लौकिकैः सहैव तथा प्रणीतानि, यथा ते लौकिकैः सह स्वयमेव सिध्यन्ति। इमानि प्रायेण २६३ सूत्राणि सन्ति, किन्तु सिद्धान्तकौमुदीकारेण महता प्रमादेन तानि सूत्राणि प्रसह्य कौमुद्याः पृष्ठभागे निक्षिप्तानि। येनेमानि सूत्राणि कौमुद्याः प्रक्रियाविज्ञानतोऽथ चाष्टाध्याय्या क्रमतोऽपि विच्छिन्नान्यकिञ्चित्कराणीव किमपि कर्तुं न प्रभवन्ति। नास्ति तेषां समीपे स्वार्थप्रकाशिका काचन सामग्री। अतो मया नव्यसिद्धान्तकौमुद्यामिमानि सूत्राणि पुनर्लौकिकैः सह समावेशितानि, येन च लौकिकैः सह वैदिकशब्दा अप्यनायासेनैव सिध्यन्ति। रक्षार्थं वेदानामध्येयं व्याकरणमिति भाष्योक्तप्रयोजनमपि चरितार्थीभवति। अस्यां नास्ति वैदिकीति नाम किमपि प्रकरणं पृथक्। अयमेव पाणिनीयः पन्थाः।

नव्यसिद्धान्तकौमुदीयं मया प्रायेण त्रयोदशसु भागेषु कल्पिता। १. संज्ञापरिभाषम् २. सन्धिः ३. औपदेशिकधातुपाठः ४. आतिदेशिकधातुपाठः ५. सार्वधातुकतिङ्कृत्प्रक्रिया ६. इडागमविज्ञानम् ७. आर्धधातुकतिङ् ८. आर्धधातुककृत् ९. तद्धिताः १०. सुबन्तं स्त्रीप्रत्ययाश्च ११. कारकम्, द्विरुक्तिश्च १२. समासाः १३. स्वरप्रक्रियाविज्ञानम्।

तस्याः स्वरप्रक्रियाविज्ञानमित्ययं त्रयोदशो भागः प्रस्तूयते।

भगवतो निःश्वासभूतः सृष्टेश्च सनातनसंविधानभूतो वेदराशिर्यथा सर्गस्यादौ ब्रह्मणा श्रुतस्तथैव भारतस्य तपस्विभिः, कुम्भीधान्यैर्ब्राह्मणैरधिगतः। अतश्च तैः स्वशिष्याणां कृते शाकल–माध्यन्दिन–काण्व–तैत्तिरीयादीनां संहितानां वेदस्य तथा प्रवचनं कृतं, यथा स एव वेदराशिरद्यापि तपोनिष्ठानां वैदिकानां कण्ठे श्रुतिपरम्परयाऽविकृतरूपेण विराराज्यते, तथैव च श्रुतिपरम्परयाद्याप्यध्याप्यते, इति स्वरविज्ञानस्यैव महिमा। यैर्बहु विलोडितो वेदस्तेषां पाश्चात्त्य–विदुषामपि कृत आश्चर्यावहं वर्तत इदं सर्वम्।

वेदस्य प्रत्येकं शब्दः स्वररज्जुभिर्निगडितः स्वस्थानात् प्रच्योतुमक्षमः स्वे महिम्नि प्रतिष्ठितो लोकं प्रकाशयतीत्येतादृग् वैलक्षण्यं संस्कृतभाषाया एव वर्ततेऽनितरसाधारण्या,

स्वरितेऽधोरेखा भवति, ह्रस्वकम्पितांशश्च '१' इति निर्दिश्यते। यथा - उक्थ्य १ वचो यतस्रुचा। अयं जात्यस्वरितः। यथा - सध्य१ ङ्नाम भद्रम्। अयं क्षैप्रस्वरितः। दीर्घस्वरिते कम्पितांशः '३' इति निर्दिश्यते। शतचक्रं यो३ ह्यो वर्तनिः। अभी३दम्।

**५. तैरोव्यञ्जनस्वरितः -**

**उदात्तपूर्वः स्वरितो व्यञ्जनेन युतो यदि।**
**एष सर्वो बहुस्वारस्तैरोव्यञ्जन उच्यते।। ( याज्ञवल्क्यशिक्षा १.८२ )**

स्वरविधौ व्यञ्जनमविद्यमानवद्भवति, इति परिभाषया 'उदात्तादनुदात्तस्य स्वरितः' इत्यनेन व्यञ्जनव्यवधानेऽपि स्वरितो भवति। व्यञ्जनेन व्यवहितत्वादयं तैरोव्यञ्जनस्वरित इत्युच्यते। अग्निमीळे पुरोहितम्। (ऋ. १.१.१)

**६. तैरोविरामस्वरितः -**

**अवग्रहात्परो यस्तु स्वरितः स्यादनन्तरम्।**
**तैरोविरामं तं विद्यादुदात्तो यद्यवग्रहः।। ( याज्ञवल्क्यशिक्षा १.८२ )**

'उदात्तादनुदात्तस्य स्वरितः' इत्यनेन उदात्तादव्यवहितपरस्यानुदात्तस्य स्वरितो विधीयते। स्वरविधाववग्रहोऽपि संहितावद् भवतीति पदपाठेऽर्धमात्राकालिके विरामेऽपि 'उदात्तादनुदात्तस्य स्वरितः' इत्यनेन स्वरितो भवत्येव। विरामेऽपि भवन्नयं स्वरितस्तैरोविराम इत्यभिधीयते। यथा - गोपताविति गो पतौ। यज्ञपतिरिति यज्ञ पतिः। विस्कभिते इति विऽस्कभिते। अयं स्वरितः पदपाठ एव स्वीक्रियते।

**७. ताथाभाव्यस्वरितः -**

**उदात्ताक्षरयोर्मध्ये भवेन्नीचस्त्ववग्रहः।**
**ताथाभाव्यो भवेत्स्वारस्तनूनप्त्रे निदर्शनम्।। ( याज्ञवल्क्यशिक्षा १.८५ )**

अयमपि स्वरितः पदपाठ एव स्वीक्रियते। वाजसनेयिप्रातिशाख्ये, याज्ञवल्क्यशिक्षायां माण्डूकीशिक्षायाञ्च लभ्यते। समस्तपदे यदोदात्तद्वयमध्येऽनुदात्तो भवति, तदा 'उदात्तादनुदात्तस्य स्वरितः' इत्यनेन उदात्तादव्यवहितपरस्यानुदात्तस्य स्वरितो न भवति। तदानीं स स्वरितभाव्यनुदात्त एव ताथाभाव्यस्वरित इत्यभिधीयते। यथा - तनूनप्त्रे इति तनू नप्त्रे।

माध्यन्दिनशिक्षायामयं न लभ्यते।

**८. पादवृत्तस्वरितः -**

**स्वरे च स्वरिते चैव विवृत्तिर्यत्र दृश्यते।**
**पादवृत्तो भवेत्स्वारः 'श्वित्रऽआदित्य' दर्शनम्।। ( याज्ञवल्क्यशिक्षा १.८५ )**

यत्र पदान्ते वर्तमानादुदात्तादचि परे मध्ये विवत्तिः (सन्ध्यभावः) श्रूयते, तत्र विवृत्तौ सत्यामपि 'उदात्तादनुदात्तस्य स्वरितः' इत्यनेन यः स्वरितो भवति, स पादवृत्तस्वरित इत्यभिधीयते। यथा - य इन्द्रः। प्रउगम्।



**डॉ. पुष्पा दीक्षिता**

अध्यक्षा, पाणिनीयशोधसंस्थानम्

बिलासपुरम्

१.७.१९४२ दिनाङ्के जबलपुरनगरस्य प्रख्यातायुर्वेदचिकित्सकात् शास्त्राणां पारदृश्वनः प्राणाचार्यपण्डितसुन्दरलालशुक्लाज्जानकीदेव्यां लब्धजनिः महामहोपाध्यायाचार्या डॉ. पुष्पा दीक्षिता, आचार्यविश्वनाथत्रिपाठिभ्यो व्याकरणमधीत्य मध्य-प्रदेशशासनस्याथ च छत्तीसगढ़प्रदेशशासनस्य महाविद्यालयीयप्राध्यापकपदान्निवृत्ता।

सा च भगवतः पाणिनेर्महत्तमेन तपसा निर्धारितं पाणिनीयाष्टाध्यायीसूत्रक्रमं साक्षात्कृत्य प्रक्रियायाः सर्वथा नवीनं क्रमं प्रक्रियाविज्ञानं च प्रोद्घाटितवती, येन निखिलाष्टाध्यायी त्रिभिर्मासैरधिगता भवतीति नास्ति संशीतिलेशोऽपि।

**प्रकाशितग्रन्थाः -**

१. अष्टाध्यायीसहजबोधः, अष्टसु भागेषु (तत्र चत्वारो भागाः प्रकाशिताः)
२. नव्यसिद्धान्तकौमुदी, चतुर्दशसु भागेषु (तत्र पञ्च भागाः प्रकाशिताः)
३. तिङन्तकोषः (त्रयो भागाः)
४. कृदन्तकोषः (द्वौ भागौ)
५. तिङ्कृत्कोषः (द्वौ भागौ)
६. लकारसरणिः (चत्वारो भागाः)
७. णिजन्तकोषः
८. सन्नन्तकोषः
९. यङन्तकोषः
१०. यङ्लुगन्तकोषः
११. इडागमः (संस्कृते, राष्ट्रभाषायाञ्च)
१२. पाणिनीयाष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः)
१३. प्रकियानुसारिपाणिनीयधातुपाठः
१४. शीघ्रबोधव्याकरणम्
१५. पाणिनीयधातुपाठः (सार्थः)
१६. औपदेशिकः पाणिनीयधातुपाठः (सार्वधातुकप्रत्ययोपयोगी)
१७. औपदेशिकः पाणिनीयधातुपाठः (आर्धधातुकप्रत्ययोपयोगी)
१८. तिङ्कृत्कोषः (द्वौ भागौ)
१९. अग्निशिखा (गीतिकाव्यम्)
२०. शाम्भवी (गीतिकाव्यम्)
२१. अपराजितवधूः (खण्डकाव्यम्) अस्य संपादनमनुवादश्च
२२. प्रबुद्धभारतम् (खण्डकाव्यम्) अस्य संपादनमनुवादश्च
२३. सौन्दर्यलहरी, अस्याः संपादनम्

**प्रकाश्यग्रन्थाः -**

२४. नव्यसिद्धान्तकौमुदी (अवशिष्टा नव भागाः)
२५. अष्टाध्यायीसहजबोधः (अवशिष्टाश्चत्वारो भागाः)
२६. परिभाषेन्दुशेखरस्य बहुतरपरिभाषाणामन्यथासिद्धिः अन्ये च